# Shrirama mangalashasanam

# શ્રીરામમઙ્ગલશાસનમ્

## Document Information


Text title : rAmamaNgalAshAsanam 1

File name : rAmamangalAshAsanam.itx

Category : raama, stotra, mangala

Location : doc_raama

Author : varavaramunisvAmi

Transliterated by : Ankur Nagpal ankurnagpal108 at gmail.com

Proofread by : Ankur Nagpal ankurnagpal108 at gmail.com

Latest update : August 14, 2022

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 14, 2022

*sanskritdocuments.org*

# શ્રીરામમઙ્ગલશાસનમ્

મઙ્ગલં કૌશલેન્દ્રાય મહનીયગુણાબ્ધયે । (કોસલેન્દ્રાય)
ચક્રવર્તિતનૂજાય સાર્વભૌમાય મઙ્ગલમ્ ॥ ૧॥

વેદવેદાન્તવેદ્યાય મેઘશ્યામલમૂર્તયે ।
પુંસાં મોહનરૂપાય પુણ્યશ્લોકાય મઙ્ગલમ્ ॥ ૨॥

વિશ્વામિત્રાન્તરઙ્ગાય મિથિલાનગરીપતેઃ ।
ભાગ્યાનાં પરિપાકાય ભવ્યરૂપાય મઙ્ગલમ્ ॥ ૩॥

પિતૃભક્તાય સતતં ભ્રાતૃભિઃ સહ સીતયા ।
નન્દિતાખિલલોકાય રામભદ્રાય મઙ્ગલમ્ ॥ ૪॥

ત્યક્તસાકેતવાસાય ચિત્રકૂટવિહારિણે ।
સેવ્યાય સર્વયમિનાં ધીરોદારાય મઙ્ગલમ્ ॥ ૫॥ (ધીરોદાત્તાય, ધીરોદયાય)

સૌમિત્રિણા ચ જાનક્યા ચાપબાણાસિધારિણે ।
સંસેવ્યાય સદા ભક્ત્યા સ્વામિને મમ મઙ્ગલમ્ ॥ ૬॥

દણ્ડકારાયવાસાય ખરદૂષણશત્રવે । (દણ્ડકારણ્યવાસાય ખણ્ડિતામરશત્રવે)
ગૃધ્રરાજાય ભક્તાય મુક્તિદાયાસ્તુ મઙ્ગલમ્ ॥ ૭॥

સાદરં શબરીદત્તફલમૂલાભિલાષિણે ।
સૌલભ્યપરિપૂર્ણાય સત્ત્વોદ્રિક્તાય મઙ્ગલમ્ ॥ ૮॥

હનુમત્સમવેતાય હરીશાભીષ્ટદાયિને ।
વાલિપ્રમથાનાયાસ્તુ મહાધીરાય મઙ્ગલમ્ ॥ ૯॥

શ્રીમતે રઘુવીરાય સેતૂલ્લઙ્ઘિતસિન્ધવે ।
જિતરાક્ષસરાજાય રણધીરાય મઙ્ગલમ્ ॥ ૧૦॥

વિભીષણકૃતે પ્રીત્યા લઙ્કાભીષ્ટપ્રદાયિને ।
સર્વલોકશરણ્યાય શ્રીરાઘવાય મઙ્ગલમ્ ॥ ૧૧॥

આસાદ્ય નગરીં દિવ્યામભિષિક્તાય સીતયા ।
રાજાધિરાજરાજાય રામભદ્રાય મઙ્ગલમ્ ॥ ૧૨॥

બ્રહ્માદિદેવસેવ્યાય બ્રહ્મણ્યાય મહાત્મને ।
જાનકીપ્રાણનાથાય રઘુનાથાય મઙ્ગલમ્ ॥ ૧૩॥

શ્રીસૌમ્યજામાતૃમુનેઃ કૃપયાસ્માનુપેયુષે ।
મહતે મમ નાથાય રઘુનાથાય મઙ્ગલમ્ ॥ ૧૪॥

મઙ્ગલાશાસનપરૈર્મદાચાર્યપુરોગમૈઃ ।
સર્વૈશ્ચ પૂર્વૈરાચાર્યૈઃ સત્કૃતાયાસ્તુ મઙ્ગલમ્ ॥ ૧૫॥

રમ્યજામાતૃમુનિના મઙ્ગલાશાસનં કૃતમ્ ।
ત્રૈલોક્યાધિપતિઃ શ્રીમાન્ કરોતુ મઙ્ગલં સદા ॥ ૧૬॥

॥ ઇતિ શ્રીવરવરમુનિસ્વામિકૃતશ્રીરામમઙ્ગલાશાસનં સમ્પૂર્ણમ્ ॥

Ankur Nagpal

*Shrirama mangalashasanam*

pdf was typeset on August 14, 2022

Please send corrections to *sanskrit@cheerful.com*